अनिवार्यपत्रम् । शास्त्री II 14-06-2021

व्याकरणछात्र हेतव: । रघुवंशम् । श्लोकव्याख्या ।

"अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय दृप्तः ।
पुरा जनस्थानविमर्दशङ्की सन्धाय लङ्काधिपतिः प्रतस्थे ॥"

सन्दर्भ: → प्रस्तुमिदं पद्यं कविकालिदासप्रणीतस्य षष्ठसर्गस्य इन्दुमतीस्वयंवरवर्णनाद् अवतरितम् अस्ति ।

प्रसङ्ग: → पाण्ड्यनरेशस्य प्रभुत्वं कविरत्र सुनन्दामुखेन इन्दुमतीं प्रति प्रकाशयति ।

अन्वय: → पुरा जनस्थानविमर्दशङ्की दृप्तः लङ्काधिपतिः दुरापम् अस्त्रं हरात् आप्तवता येन सन्धाय इन्द्रलोकावजयाय प्रतस्थे ।

शब्दार्थ: व्याकरणञ्च → पुरा = प्राक्, इन्द्रपुरीविजयसमये ।
जनस्थानविमर्दशङ्की → जनस्थानस्य विमर्दं शङ्कते इति = दण्डकारण्यविनाशभीतः । दृप्तः → √दृप् + क्त = उद्धतः, उद्दण्डः, दुर्दान्तः । लङ्काधिपतिः → लङ्कायाः अधिपतिः = रावणः । दुरापम् → दुः + आपम् = दुःसाध्यम् । अस्त्रं → √अस् + ष्ट्रन् = आयुधम् । हरात् = शङ्करात्, शिवात् । आप्तवता = प्राप्तवता । येन = पाण्ड्यनृपेण । सन्धाय = मैत्रीं विधाय । इन्द्रलोकावजयाय → इन्द्रस्य लोकस्य अवजयः, तस्मै = देवलोकं विजयाय । प्रतस्थे = प्रययौ

तात्पर्य: → दण्डकारण्यस्य विनाशशङ्कया शिवात् दुर्लभमस्त्रं लब्धवताऽनेन पाण्ड्येण साकं रावणोऽपि सन्धिं कृत्वा देवपुरीं जेतुं प्रययौ ।

विशेष: → अत्र श्लोके वीररसः, वैदर्भीरीतिः, प्रसादगुणः, अनुप्रासालङ्कारः, उपजातिवृत्तिञ्च ।

14-06-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० खुरखसेना, पूर्णियाँ

① 14-06-21

उपशास्त्री I + II

दोनों वर्ष के छात्रों के लिए निर्देश →

विश्वविद्यालयीय वार्षिकी परीक्षा में दोनों वर्षों के पाठ्यक्रम से प्रश्न पूछे जाते हैं। उपशास्त्री प्रथमवर्ष के लिए जो ऑनलाइन प्रश्नोत्तर रूप शिक्षण कार्य होते हैं उसकी तैयारी उपशास्त्री प्रथमवर्ष के छात्र करेंगे किन्तु उपशास्त्री द्वितीय वर्ष के छात्र दोनों वर्षों के लिए दिए गए पाठ्यक्रम से सम्बन्धित तैयारी करेंगे। उपशास्त्री दोनों वर्षों के लिए जो पाठ्यक्रम है, उसकी सम्पूर्ण तैयारी उपशास्त्री द्वितीयवर्ष के छात्र/छात्राएँ करेंगी।

शब्दरूप, धातुरूप, सन्धि, समास, अव्यय, संस्कृत से हिन्दी एवं हिन्दी से संस्कृत में अनुवाद सन्धि में स्वर सन्धि, समास में अव्ययीभाव, तत्पुरुष, कर्मधारय, नञ् तथा प्रादि। इसके अतिरिक्त — "हितोपदेश (नारायण पण्डितविरचित) में मित्रलाभ"। यह पाठ्यक्रम उपशास्त्री प्रथमवर्ष (अनिवार्य प्रश्नपत्र संस्कृत सामान्य) के लिए है।

उपशास्त्री द्वितीयवर्ष के छात्रों को अनिवार्य प्रश्नपत्र, संस्कृत सामान्य के रूप में उपर्युक्त पाठ्यक्रम तो पढ़ना ही है, इसके अतिरिक्त सन्धि में श्चुत्व, ष्टुत्व, परसवर्ण, पूर्वसवर्ण, अनुस्वार, सत्व, औत्वादि हल् सन्धि पढ़ने होंगे। समास में बहुव्रीहि तथा द्वन्द्व।

शेष अगले पृष्ठ पर →

②

कारक एवं उपपद विभक्ति का सामान्य ज्ञान। कृत् प्रत्ययों में तव्य, अनीयर, ण्यत्, यत्, क्यप्, कृत्य, क्त, क्तवतु, शतृ, शानच्, क्त्वा, ल्यप्, घञ्, ण्वुल्, क्तिन्।

तद्धित प्रत्ययों में → अपत्यार्थक अण्, इञ्, यञ्, शैषिक अण्, भावार्थक त्व तथा तल् प्रत्ययों को पढ़ना है।

स्त्री प्रत्यय → टाप्, ङीष्, ङीप्, ऊङ्, ति।

इसके अतिरिक्त संस्कृत निबन्ध तथा पत्र-लेखन।

उपशास्त्री द्वितीयवर्ष के छात्रों को प्रथमवर्ष की भी तैयारी करनी है।

14-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

साहित्यम्  शास्त्री I  14-06-21

शिशुपालवधम् ।  श्लोकव्याख्या ।

"न द्रुह्ये सात्वतीसूनुः यन्मह्यमपराध्यति ।
यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम्॥"

अन्वयः → सात्वतीसूनुः यत् मह्यम् अपराध्यति (तत्) न द्रुह्ये यत् तु लोकं दन्दह्यते, अदः मां दुःखाकरोति ।

शब्दार्थः → सात्वतीसूनुः - सात्वतीपुत्रः, शिशुपालः। यत्- यस्मात् कारणात् । मह्यम् - अस्मद् शब्दस्य चतुर्थी विभक्तेः एकवचने रूपम्, श्रीकृष्णाय । अपराध्यति - द्रुह्यति। तत् - तस्मात् कारणात् । न द्रुह्ये - परितप्ये । यत्तु - यतो हि। लोकम् - जनम् । दन्दह्यते - निष्कारणं पीडयति । अदः - इदं लोकदहनम् । माम् - अस्मद् शब्दस्य द्वितीयायाम् एकवचने रूपम्, श्रीकृष्णम् । दुःखाकरोति - पीडयति ।

समासः → सात्वतीसूनुः - सत्वतोऽपत्यं स्त्री सात्वती, सात्वत्या सूनुः सात्वतीसूनुः ।

प्रसङ्गः → श्लोकोऽयं महाकविमाघप्रणीतस्य शिशुपालवधमहाकाव्यस्य द्वितीयसर्गात् उद्धृतः । अत्र कविः वर्णयति यत् श्रीकृष्णः न तु स्वार्थसाधनाय अपितु लोककल्याणार्थमेव शिशुपालं हन्तुमिच्छति। श्रीकृष्णः कथयति यत् शिशुपालः मह्यं द्रुह्यति तस्मात् कारणात् अहं न खिद्ये किन्तु स लोकं जनं वा निष्कारणं पीडयति, इदमेव लोकपीडनं मां दुःखाकरोति ।

अस्मिन् श्लोके अर्थान्तरन्यासालङ्कारः अनुष्टुब्वृत्तम् च ।
सामान्यकथनस्य विशिष्टकथनेन समर्थनम्।

14-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
साधा-उमाकान्त संस्कृत महावि० सुरवसेना, पूर्णियाँ ।

14-06-2021

संस्कृतसामान्यम्। उपशास्त्री - I
अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवः ।
न च विद्याऽऽगमः कश्चित्तं देशं परिवर्जयेत् ।।"

सन्दर्भ:→ प्रस्तुतोऽयं श्लोकः महाकविश्रीनारायणपण्डितरचितस्य 'हितोपदेश' ग्रन्थात् 'मित्रलाभात्' भागात् गृहीतोऽस्ति ।

अन्वयः→ यस्मिन् देशे सम्मानो न, वृत्तिः न, बान्धवः न, न च कश्चित् विद्यागमः (अस्ति), तं देशं परिवर्जयेत् ।

शब्दार्थः व्याकरणञ्च → यस्मिन् = यत् शब्दस्य सप्तमी विभक्तौ एकवचने पुल्लिङ्गे नपुंसके वा रूपम् = यत्र स्थाने । देशे = राष्ट्रे । न = निषेधार्थकाव्ययः, नहि । सम्मानः → सम् + मानः, (सत्कारः) । वृत्तिः → √वृत् + क्तिन् = व्यवसायः, आजीविका । विद्याऽऽगमः → विद्या + आगमः = विद्यालाभः । कश्चित् → कः + चित् = कोऽपि निश्चयेन । तम् → तत् पुल्लिङ्गे द्वितीयायामेकवचने रूपम् = तं स्थानम् । परिवर्जयेत् → परि उपसर्गपूर्वकात् वृज् धातोः विधिलिङ्गे रूपम् = त्यजेत्, त्यक्तुं शक्यते ।

बान्धवः → बन्धु + अण् ।

आशयः→ कविरत्र निवासयोग्यं स्थानं देशं वा वर्णयति । सः कथयति यत् यत्र स्थाने देशे वा जीविकोपार्जनस्य साधनं न वर्तते, जनाः प्रवासीपुरुषस्य सम्मानं, आतिथ्यं सत्कारः वा न कुर्वन्ति, विद्यालाभस्य साधनं नैवास्ति तथा च तस्मिन् देशे स्वजनस्य अभावमस्ति, एतादृशं स्थानं देशं वा त्यजेत् । एतादृशे स्थाने जीवनयापनं कठिनं भवति ।

14-06-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

अनिवार्य पत्रम् 13-06-2021
व्याकरणछात्रहेतवे
शास्त्री II

रघुवंशम् । श्लोकव्याख्या ।

" प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवम् ।
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → कविरत्र हेमाङ्गदं राजानं प्रति इन्दुमत्याः निःस्पृहदृष्टिविशेषं सोपमं वर्णयति ।

अन्वयः → आकृतिलोभनीया विदर्भराजावरजा तया एवं प्रलोभिता अपि नीत्या दूरकृष्टा लक्ष्मीः प्रतिकूलदैवात् जनात् इव तस्मात् अपावर्तत ।

व्याख्या → आकृतिलोभनीया → स्वरूपाकर्षणीया । विदर्भराजावरजा → विदर्भराजस्य अवरं जाता या सा = इन्दुमती । तया = सुनन्दया । एवम् = इत्थम् । प्रलोभिताऽपि = प्रेरितापि । नीत्या = पुरुषकारेण । दैवेन । दूरकृष्टा = दूरमानीता । लक्ष्मीः = श्रीः । प्रतिकूलदैवात् → प्रतिकूलं दैवं यस्य सः = विपरीतभाग्यात् । जनात् = व्यक्तेः । इव = यथा । तस्मात् = हेमाङ्गदात् । अपावर्तत = प्रतिनिवृत्ता ।

तात्पर्यः → इन्दुमती हेमाङ्गदं परित्यज्य तथैव पुरो गता, यथा विरुद्धभाग्यात् पुरुषार्थकारकं पुरुषं परित्यज्य लक्ष्मीः प्रयाति ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तिश्च ।

13-06-2021

डॉ॰ निर्मलकुमार झा, (स॰ प्राचार्यः)।
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।